10.91

॥अथानंतदेवकृतांत्येष्टिप्रारंभः॥
पत्र १८

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY

॥एर्ण्या श्रीगणेशायनमः॥ ॥अथानंतदेवस्यअंत्येष्टिप्रयोगः॥ ।आहिता
ग्नेःकस्यपक्षेमरणशंकायांपक्षहोमन्यायेनअग्निनैकद्वेसमस्तहोमन्यायेन
वाअवशिष्टहोमाःकार्याः नात्रकालनियमः यदैवशंकातदैवकार्याः द
र्शेष्टिश्चतदैवकार्या इष्टसंन्नवेप्रधानदेवताभ्यश्चतुर्गृहीताज्यान्येकैक
स्यैदेवतायैजुहोतुवाक्यामन्त्र्ययाज्ययातुजुह्वयादितिभारद्वाजसूत्रं शु
क्लपक्षेरात्रौमरणशंकायांप्रातर्होमंकुर्यात् वातुमीस्यांतरालेमरणशंका
यामंत्यपर्वपर्यंतंतावत्यग्निहोत्राणिदर्शपूर्णमासाभ्यावशिष्टपर्वाणिकुर्यो
त् मरणशंकायासंन्नवेमरणानंतरमप्येतानिकार्याणितानिचसर्वज्ञतानि पू १
र्णीज्ञतयोवाइष्टेर्नास्थानेकार्यीइतिकेवित् अहिताग्निःकदाचित्कस्यप

क्षेमृतोयदि तदाशेषाज्ञतीःसर्वीज्जुहोतीत्यश्वलायनंइतित्रिकांडमंडनः अ
ग्निविच्छेददशायांमरणसंशयेआधानंपावमानेष्यश्वकार्याः नात्रकालनिय
मः द्व्यहकालासंन्नवेसद्यस्कालमपिकार्यं पवमानेष्टयसंन्नवेपूर्णीज्ञतंतमग्ना
धेयंविधेयं शाखांतरेपूर्णीज्ञत्यंतपक्षविधानात्सत्रसूत्रस्वरसाच्च अथनष्टा
ग्निपरुताग्निविछिन्नाग्न्युत्सृष्टाग्निविधुराग्निमृतविधुरा ग्नीनामाहिताग्नीनां
दिष्टांगतिंगतानांदाहायाग्न्युत्पत्तिप्रकारः श्रीरंगराजेननिरूपितः तत्रनष्टाग्निः
पतितकुणपरजस्वलासूतिकादिसंस्पर्शेनोपरुताःअग्नयस्त्यक्ताःपुनराधानंत्व
नक्तंयेनसःअरणीगताग्निनाशेषनष्टाग्निः अपरुताग्निःस्वाग्निभ्रमेणकेन
चित्समारोपणमरण्योर्विधायाग्नयोयस्यनीताःद्वेषादिनावायस्यसः विछि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

अंत्ये० २

नाग्निःराजदैवोयज्ञवशेनत्यक्ताग्निः उत्सृष्टाग्निराधानंतरंमनुष्यज्ञव्यादिह
नोसत्यांतमग्निमुत्सर्गेस्थात्यक्तवान्सः विधुराग्निर्न्नर्यायोमृतायांतयासहव
हिष्युगतेषु देशांतरेयजमानःपूर्वमृतःपश्चात्पत्नीमृतायजमानमरणवार्त्तामश्रु
त्वापत्नीपुत्रादिनाग्निनिःसंस्कृतापश्चाद्यजमानस्यमरणंश्रुतंएवंसतिमृतविधु
राग्निः अथप्रयोगोलिख्यते मृतंयजमानंस्नापयित्वाहतेनवाससाच्छाद्यय
रणीस्तस्यदारण्योर्निकटेनिधायप्राणानायम्यदेशकालौसंकीर्त्यममपितुर्नेष्टा
ग्नेर्वाअप हृताग्नेर्वाविच्छिन्नाग्नेर्वाउत्सृष्टाग्नेर्वायैतन्मेधिकंसंस्कारंकर्तुंजे
ताधानंकरिष्यइतिसंकल्प्य प्राचीनावी तीदक्षिणाग्रांवेदीविधायतत्रपुरु २
ष्यावोक्ष्ययजमानायतनेऽग्रेतंनिधाय गार्हपत्यायतनेअरणीनिधायऽग्रेतस्य

दक्षिणंबाऊमन्वारभ्यमंथति यस्याग्नयोजुह्वतोमांसकामाःसंकल्पयंतेयज
मानमांसं जायंतुतेहविषेसादितायस्वर्गंलोकमिमंऽग्रेतंनयंत्विति ततऊषादिय
थासंभवंसंभारानभ्यायतनेषुनिधायाग्नीन्विहृत्यापसव्यंपरिस्तीर्यगार्हपत्येआ
ज्यंसंस्कृत्यस्रुक्स्रुवसंमार्गंतिमनस्वतींचतुर्गृहीतैस्त्रिभिरग्निषुजुह्वाद्दशा
गृहीतेनस्रुचंपूरयित्वा पुरुषसूक्तंमनसोन्वार्याणुवाकांतेसकृद्देवगार्हपत्येजु
होति पुनस्तथैवदक्षिणाग्नौतथैवाहवनीयेद्वादशगृहीतेनस्रुचंपूरयित्वेत्या
दि ततस्तैरग्निभिःसंस्कुर्यात् अर्धाधानेगृह्यग्नि नाशेतमुत्पाद्यसर्वंदहेति ३
अविद्यमानयोररण्योस्तूष्णींवह्निहारंकृत्वालौकिकारणीसंपाद्यपात्राण्यानी
यनोक्तेनवानियोअभ्यस्यइतिपात्रैःसहारणीसंस्पृश्यऊषाःसिकताःआस्तृक

रंवल्मीकवपंसृंदंवराहविहतंशुष्करपर्णंशर्कराइतिपार्थिवाः अश्वत्थोदुंबरपलाशशमीविकंकताशनिहतमुंजकुलायानिसंभारंस्तृंलीसंस्पृश्यतृंलीसंहृत्यनिदधाति ततऔपासनार्थेअंबरीषादेवादीप्यान्नशकलान्संप्रकीर्यांजलिनोपस्तीर्णेनिधारितंसर्वौषधंजुहोति अग्नयेसर्वौषधायस्वाहेति यजन
नायस्वाहेति ततोजघनभ्यांताभ्यांहृन्नाभ्यांहोमान्जुहुत्वाकेवलमाहुतीः
स्रुवेणजुहुत्वाघनस्वादित्यामनोज्योतिरितिहृदयाभ्यांचतुर्गृहीतहृदयंवाजुहुत्वाप्रजापतेनत्वदितिअन्वग्निरितिचतुर्गृहीताभ्यांजुहोति ततःस्रुवेणव्याहृतीर्जुहुत्वा
तमग्निमादायगार्हपत्येनिधायपरिसमूहनादिस्रुक्संमार्जनांतेध्रुवेधसइति
चतुर्गृहीतेनजुहुत्वागार्हपत्यस्यपश्चात्स्रेतंनिधायतृंलीबर्हिकाष्ठानिगार्हप

स्येनिक्षिप्यारणीआदायतस्मिन्नग्नोनिष्टपतिजातवेदोसुव ॰अयंतेयोनिरि
त्वि तमग्निंशरावेजुहुत्वादक्षिणतोनिधायायतनान्युपलिप्यपेतवीतेति
संभारांस्त्रेधाविभज्यायतनेषुतृंलीनिरूप्यगार्हपत्यायतनेसंभाराणामुप
रिमुंजलायंनिधायतस्मिन्प्रतीचीनप्रजननामधरारणींनिधायत्रेतस्यदक्षि
णेबाजमन्वारभ्यस्याग्नयोजुष्टतमइतिपूर्वोक्तमंत्रेणमथित्वाजातमग्निंसुव
रितिसुपस्थायतमग्निंभूरितिगार्हपत्येनिधायाहवनीयप्रणयनायाग्निमु
द्धृत्योत्तरभागेनिधायघृतगार्हपत्यादेकदेशमादायध्रुवइतिदक्षिणाग्नेरायत
नेनिधायोत्तरभागेस्थापितमग्निमाहवनीयायतनेसुवरितिनिधायहिरण्य
शकलमग्नित्रयेपिक्रमेणनिक्षिप्यराजतशकलमज्ञायकस्मैविदुत्वाभ्रुवः

अंत्ये० ४ सुवरितिध्रुवेकमुपस्थायस्वाहेतिस्रुचिः सर्वौषधमग्नित्रयेपिञ्जित्वाअश्वत्थोडुंबर
पलाशशमीविकंकतसमिधः पंचपंचाभ्यक्तास्त्रीवह्नित्रयेपिञ्जित्वाहवनीयंपरि
स्तीर्याज्यंसंस्कृत्यचतुर्गृहीतेन समंतेअग्नइतिध्रुवेणाज्यंजित्वाचतुर्गृ
हीतंगृहीत्वापावमानेष्टिदेवताभ्योजुहुयात् ततोद्वादशगृहीतेनस्रुवंध्रुवयित्वाज्य
रूपसंस्कृंसर्वमिनसोद्यायंतिसर्वंह्युहोति पुनर्द्वादशगृहीतेनान्वाहार्यपचने तथै
वाहवनीये इध्मंप्रेताधानंविधायतैरग्निभिःसंस्कुर्यात् विधुराहिताग्नेरयमे
राज वक्रमः तथामृतविधुराग्नेरितिश्रीरंगैकृतः प्रेताधानप्रयोगः देवभाष्ये आ ४
यस्तंबः यद्याहिताग्निरुत्सृष्टाग्निर्विधुराग्निर्विच्छिन्नाग्निर्वा म्रियेतनतमन्येन
त्रेताग्निभ्योदहंतितस्यप्राचीनावीत्यम्यायतनान्युद्धृत्यवोक्ष्ययजमानायतन

नेप्रेतंनिधायगार्हपत्यायतनेरणीनिधायमंथतियस्या० नयंत्रितिस्रुचंहुत्वा
द्वादशगृहीतेनस्रुवंध्रुवयित्वास्रुचंहुत्वाप्रेतेमात्वाइत्येतदादिकंमंत्रंप्रतिपद्य
तइति भारद्वाजसूत्रेतु प्राचीनावीत्यम्यायतनान्युद्धृत्यावोक्ष्ययजमानायतने
प्रेतंनिधायगार्हपत्यायतनेऽरणीनिधायमंथति यस्याग्नयोजुहुतोमांसकामा
संकल्पयंतेयजमानमांसं जायंतुतेहविषेसादितायस्वर्गंलोकमिमंनयंतुइति प्रेतं
स्रुचंहुत्वाद्वादशगृहीतेनस्रुवंध्रुवयित्वास्रुचंहुत्वाप्रेतेमात्वाइत्येतदादिम
न्त्रंपठेत्सुक्रं अतएवाहिताग्निविधवामरणेपिप्रेताधानं तदुक्रंकात्यायनेन
ध्रुवंमृतस्यदंपत्योःप्रेताधानंपरस्यतु द्विषट्याहंस्रुवंध्रुवंप्रविलाप्याज्यसंस्कृ
तिः स्रुचामेवजुहोतीतिप्रेताधानमुदीरितमिति ध्रुवंमृतस्यत्रेताग्निभिरिति ध्रुवं

न्वयःपत्नीचेद्विधवान्त्स्याद्यमीयेतकदाचन तदाश्रौताग्निश्चन्त्स्यान्निर्मथ्येनै
वदहेदितित्रिकांडमंडनः अत्राजदैवयाज्ञिकाः यजमानमरणानंतरंपत्नी
मरणेतस्याअपिदाहार्थंग्नेताधानेना ग्नीनामुत्पादनंकार्यंग्नेताधानासंभवेवप
श्चान्मृतस्यब्रह्मपुराणद्यौकिकाग्निनादाहोनिर्मथ्येनकपालाग्निनावेति।
स्मृतिचंद्रिकायामपिसवधिानेत्वेकनार्यस्यपूर्वंनार्यामरणेपुनर्विवाहेछायां
तत्राग्निहोत्रंहुत्वात्स्यज्यपुनःपरिणीयतयासहाधानंपुनर्विवाहासामर्थ्येआत्मा
र्थमग्न्याधानं दारकर्मणियद्यशक्तआत्मार्थमग्न्याधेयंदर्शाग्निहोत्राग्रयणा
र्थंशेषकर्मणिनभवेत्यापस्तंबस्मरणात् विष्णुत्याकुशपत्नीसहवाआधा
नं एवंकृताधानस्यत्रेताग्निनिरेवदाहः आधानेप्यसामर्थ्येयजमानदाहाय

त्रेताधानमेव पूर्वंयजमानमरणेतस्यत्रेताग्निनिर्दाहः पत्नीनांत्रेताधानमेव।
अर्धाधानेत्वेकनार्यस्यपूर्वंमरणेतस्याग्नित्रेतायांपित्रमेधःपत्न्यास्त्वौपासनेन
तयोर्यःपूर्वंत्रेतस्तस्याग्नित्रेतायांपित्रमेधःसंपद्यते यःपश्चात्तस्यौपासनइत्य
पस्तंबस्मरणात् अत्रैवपत्न्याःपूर्वंमरणेतत्राग्निहौत्रौपासनंत्वौत्स्यज्यपुनःपरि
णीयतयासहाधानं तत्रासामर्थ्यआत्मार्थमाधानं तत्राप्यसामर्थ्येयजमान स्यौ
पासने अर्धाग्निनोनेकनार्यस्यपूर्वंमरणेत्रेताग्निनिरेवदाहः पत्नीनांतुस्वैः
स्वैरौपासनस्यांशैः स्वैस्वैरौपासनस्यांशैरग्नेर्वास्याऽपोषणमितिकल्पनाभ्या
त् जायापत्योर्युगपन्मरणेसहैवपित्रमेधइति यदिपूर्वंपत्नीम्रियतेतदाश्रौ
ताग्निनिस्तादग्ध्वापुनर्विवाहंकृत्वा ग्नीनादधीत तदुक्तं दाहयित्वाग्निहोत्रे

णस्त्रियंमृतवतीपतिः अहरेद्विधिवद्दारानग्नीञ्छेषाविलंबयन् भार्यायेश्वरी
मारिष्येदत्वाग्नीनंत्यकर्मणि पुनर्दारक्रियांकुर्यात्पुनराधानमेवचेति विवा
हाश क्राउक्तंभारद्वाजसूत्रेदारकर्मणियद्यशक्नुयादित्यादि त्रिकांडमंडनेनतु
इदमुक्तं पुनःपरिणयाधानेस्वाग्निनोयदिसिध्यतः पत्न्यैमृतायैश्रोताग्नीन्द
द्यान्निर्मथ्यमन्यथा किंत्वेतावदिहाप्यस्तिदग्ध्वानिर्मथ्यवह्निना उत्सर्गेष्या
त्यजेदग्नीन्पुनस्तानाधत्तवेति अयंपुनराधेयविधिः पूर्वस्यांदोषेणानधि
कारिण्यां नत्वग्न्यजत्वादिनिःपुनर्विवाहेपि अउष्टालग्नतेत्युक्तीर्थतोनतु
धर्मतइतिस्मृतेरिति चंद्रिकायां कात्यायनदेवनाथेतु पुनःपरिणयाधा
नंनसिध्येतेमृताग्वसागार्हपत्यैकदेशेनदाह्यमन्वादिशासनादितिपक्षांत

रमुक्तं अग्नेकदेशस्यकृत्स्नस्यवाधारणेतत्पत्नियोनयुक्ता श्रवाग्नयो
वाएतेयत्पत्न्यामृतायांधार्यंतइतिकठश्रुत्यातेषांपित्रग्नेर्धैकार्थत्वश्रवणा
दितिचंद्रिकायां मृतभार्यस्ययागादोसर्वस्त्रीकर्मलुप्यतेनान्येनकेनचित्का
र्यंमृतायाकर्मकिंचन फल्गीकारादियःकश्चिदिहदासीपिनष्ट्वा संपत्नीय
ऊतिस्तत्रसर्वंधैवविलुप्यते अस्त्रीकस्यहविःपाकोनियतःपूर्वपावके सर्व
थानापरेवहाविंतिकात्यायनोब्रवीदितित्रिकांडमंडनः अथभारद्वाजसूत्र
स्थंकिंचिद्विस्मरते यद्याहिताग्निःपशुम्योम्रियेतागावोअग्मन्निति द्वेचतुर्गृही
तेनजुहुयात् यद्याहिताग्निरश्वम्रियेतेमंमेवरुणतत्वायामीति द्वेचतुर्गृहीते
जुहुयात् यद्याहिताग्निर्विषदष्टोम्रियेतदंष्ट्राभ्यामग्निर्मुनिति द्वेचतुर्गृह

अंत्ये० ७

तैनुऊयादिति पित्रमेधाग्नीनामनुगमेद्वयोरेकस्यवा सर्वेषामेकविनाशोक्तं
होत्रादीनामन्यतमेनप्रायश्चित्तंकुर्यात् शरीरदाहादारभ्यसंस्थानानाशेनस्म
समारोपणाद्याहृताग्निंत्वासर्वान्होत्रुनुऊयाद्यात्रतिनिर्वेत्युक्तंप्रायश्चित्तप्र
दीपे मनस्वतीहोमआदिशब्देन शाखांतरोक्तस्तत्तदनुगमनिंतेहोमश्च यस्मिन्ना मि
हिताग्नौजीवत्येवमृतइतिशब्दःसंजायते तदासुरग्निमतीष्टिःकार्या अष्टकपा
लोऽत्र अग्निःसुरग्निर्देवता गंधवतीग्निःश्रोक्षणीग्निःश्रोक्षणादीनिकुर्यात् गं
धवंतऋत्विजःस्वरेयुः अग्निर्होतान्यसीदद्यजीयान्साध्नोमकर्देवबीतिंनोअद्ये
तियाज्यानुवाक्येअग्नेःसुरग्नेरहंदेवयज्ययान्नादोभूयासमित्युक्तंप्रायश्चित्तप्र ७
दीपे अथाहिताग्नेराश्वलायनोक्तदाहादिविधिः मरणानंतरंदाहाधिकारिणोम्र

ध्यदेशोछ्रितंसमंतान्निम्नंपर्याकाशदेशंश्मशानंकल्पयित्वाकंटकीक्षीरवृक्षानुद्धृ
स्यतत्रभूम्येकदेशमाग्नेय्यांनैर्ऋत्यांवाबऊलौषधिकंदक्षिणाप्रवणंनैर्ऋतीप्रव
णमाग्नेयीप्रवणंवायावद्दूर्ध्वबाऊर्यजमानस्तावदायामंषंवारत्निविस्तंतद्दशां
गुलंगंभीरमाग्नेय्यायतंसजातीयैःस्वानयेयुः ततःश्वेतस्यमलंधक्षाल्यस्नापयित्वा
केशश्मश्रुलोमनखानिवापयित्वानलदेनानुलिप्यनलदमालांतदभावेजपामालां
वाप्रतिमुच्यकर्त्तादेशकालौस्मृत्वापित्रादेरूर्ध्वंछिष्टाधरोछिष्टोनयोछिष्टास्पृश्य
स्पृष्टिरवद्वामरणादिजनितप्रत्यवायंयंकछ्रत्रयादिरूपंप्रायश्चित्तंसंकल्प्यात्म
शुध्यर्थंत्रिकछ्रत्रयंसंकल्प्य कक्षोपस्थवर्जंलोमनखानिवापयेत् पित्रादिमृतोद
क्षिणंसंस्थाप्यवामश्मश्रुवपनमादौ वामकर्णच्छेदेशवपनारंभइत्युक्तंग्रंथ

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH OF THE

परिहार

ष्टके परिहितवस्त्रंप्राक्शिरसंप्रेतंशाययित्वाऽहतवाससमभ्यतुर्थभागंमूलदे
शेछित्वाप्रत्यक्कदशेरवशिष्टैस्त्रिभिर्भागैःशिरःप्रभृत्यंगुलीपर्यंतंयादतलवर्जं
प्रेतमाछाद्यवाससमभ्यतुर्थभागेनात्मनउत्तरीयंप्रेतकार्येष्वाद्यादशाहांतंकर्तृकुर्यात्त
बर्हिस्तरमाज्यंबर्हिश्चोपकल्पयेत् दधिमिश्राज्यंच ततोदाहदेशंप्रत्याहवनीयाद्य
न्नीस्तदनुदक्षऽपलालोहवर्जितयज्ञपात्राणिवैपरित्येनवासजातीयानयेयुः तदनु
प्रेतमनुजोहृद्यानयेयुः प्रेताग्नि पात्राणामन्योन्यव्यवायंनकुर्यात् अनुस्तरणीतु
रुताहृतेतिनेहोव्यते प्रेतस्यसुत्राद्यश्चाधःकृतप्रावरणोपवीतुरुकेशाहृद्धुर
सराःपश्चाद्धरेयुः तंदेशंप्राप्यसर्वंनिधायदाहगर्तादीशानेवितस्तिमात्रंगर्तंकृत्वा
तत्रोदकमवकांशीपालंवनिदध्यात् ततःकर्तापादौप्रक्षाल्यामंत्रंकंप्राणायामंकृ

स्वादेशकालौसंकीर्त्यामुकगोत्रस्यममामुकशर्मणोमत्पित्रादेःप्रेतस्यप्रेतत्वमो
क्षार्थमोर्ध्वदेहिकंकरिष्यैतिसंकल्प्य कृतापसव्यःप्रवेक्षिगर्तादकेनतदग्नावे
न्येनवोदकेनाप्रदक्षिणंशमीशाखयादाहस्थानंपरिव्रजन्त्रिःप्रोक्षेत् अपेत
वीतविचसर्पतातइतिमंत्रमावर्त्तयेत् ततःस्थानंतेतद्वहिर्वाग्नेय्यामाहवनीयं वा
यत्यागार्हपत्यं नैर्ऋत्येदक्षिणाग्निनिदध्यात्सर्वाधानिनः अग्न्याधानिनस्तुगार्ह
पत्यसमीपेऽौपासनमपिनिदध्यात् दक्षिणाग्नेर्दक्षिणेपश्चिमेवातये
वजयंतोक्तेः अथन्मिशार्थयेत् उपसर्पतिसंकुसुकःपितृमेधास्त्रिष्वपि मंत्र
मुच्चार्य अपसर्पतयेप्रेतायेकेचिदिहप्रवर्जाः स्वस्तिनःकृणुतमास्मुपातःपुनरा
गमत् ततोदिविजाताअमुजाताइतिसर्वानुवंप्रोक्ष्य यमायत्वाहनपतयेत्रो

इतिमध्ये। उत्तरतः। दक्षिणतः।

अंसे० ६ क्षिरवामिं कालायदहनपतयेवो०मृत्यवेदहनपतयेवो०मीतिमंत्रत्रयेणापसव्यं न्मोरेरवात्रयमुच्छिरस्यरवातेतिलोदकंक्षिपेत् यमायदहनपतयेपितृभ्यस्वधा नमइतिमध्ये कालायदहनपतयेपितृभ्यःस्वधानमइत्युत्तरतः मृत्यवेदहनपत म
येपितृभ्यःस्वधानमःइतिदक्षिणतः आहवनीयाउत्तरतःचमसेनापःप्रणयेत्॥
रवातेहिरण्यशकलंतिलांश्चप्रक्षिप्यसजातीयास्तृयज्ञियकाष्ठेश्चितिंकुशलाः
सजातीयाःकुर्युः कर्त्रीचितौबर्हिरास्तीर्यतिस्रोर्ध्वलोमाजिनमास्तीर्यगार्हपत्याउ
त्तरेणप्रेतंनीत्वाआहवनीयाग्निमुखशिरसंचितौसंवेश्यप्रेतस्योत्तरतश्चितौतत्प
त्नीसंवेशयेत् तांदेवरःशिष्योजरद्वासोवोत्थापयेत् उदीर्ष्वेतिमंत्रेणप्रेतस्यमु ६
खादिमुहिरण्यशकलान्पाज्यबिंदून्वोप्रक्षिप्यप्रेतेध्मताक्तांस्तिलानवकीर्यपात्रा

णियोजयेत् दक्षिणहस्तेजुहूं वरुणप्रघासादौमरणेजुहूद्वयमपियोज्यं स
व्यहस्तेनपक्षतं वरुणप्रघासादौद्वयमपि दक्षिणपार्श्वेस्थं सव्येग्निहोत्रहवणी
उत्तरसिध्मवा शिरसिकपालानि सोममरणेग्निषवणावाणोदंतेषुयोज्याः स्रुवं
न्नित्वानासाद्ये वरुणप्रघासादौस्रुवद्वयंनासाद्ये प्राशित्रहरणंन्नित्वानासा
द्ये हविरासादनपात्रीइडापात्रधानीचोदरे उपस्तेशम्यांध्रुवेरिणीदक्षिणजंघा २
यांध्रुवस्रुवंसव्यायांध्रुसलं स्रुपंन्नित्वापादयोः यदाविकृतोद्वंतदैकैकंयोजये
त् अपरालियथायोगंयोजयेत् बिलवंतिपात्राणिघृतदाज्येनघृत्वायोज्यानि।
दृषदुपलेगृहएवस्थाप्ये लोहयुक्तंसर्वंपुत्रेगृह्णीयात् ततोग्नेर्वंतिशिरसिमुरवे
वसक्तुरूपेनाछाद्यातिष्ठेतिद्वाभ्यांपाण्योः सक्तुपिंडावधाय हृदयन्यांगेषुचत्

श्रीसक्तुपिंडान्दत्वाऽममाग्नऽइत्यमसानुमंत्रणंकृत्वात्स्रीमाज्यमुत्सृज्यान्यस्रुवं
तूस्रीसमभ्यदक्षिणाग्निंपरिसमुह्यपर्युक्ष्यपरिस्तीर्यौकधारणायाअविरोधे
नसव्यंजान्वाच्याऽऽज्यंचतुष्टयंजुहुयात् अग्नयेस्वाहा कामायस्वाहा लोका
य०अनुमतये०जान्वाच्येवप्रेतोरसिप्रेवमीमाऽऽज्यमित्यस्माद्वैत्वमजायथाऽऽइति
मंत्रेणजुहुयात् प्रेतोपरिकाष्ठानिनिधायपरिकर्मिभ्यःप्रेषंदद्यात् युगपद
मीनप्रज्वालयतेति तेचयुगपदेवप्रज्वालयेयुः अतऊर्ध्वकर्तव्यमनाहिता
ग्निवत् इहप्रतीकोपात्तामंत्रास्तादाहयज्ञतोऽष्टव्याः इतिसाग्निकदाहवि
धिः यदिसाग्नि-र्दूरस्थोगृहेचतत्पत्नीमृतापत्नीसमीपेग्निंस्थितोयजमानोन्य
त्रमृतस्तदापुत्रादिःतदागमनपर्यंतंचौर्ध्वदैहिकंनकुर्यात् उक्तंचऽरेसा

ग्निःपतिःपत्नीमृतासाप्युतसाग्निकः ऽरेपतिर्मृत स्तत्रापुत्कर्षसतित्वात्मज
ऽति अथारणीसमारोपिताग्नेर्दाहविधिः अग्नावरण्योरारूढेप्रमीयेतपति-
र्यदिप्रेतंस्थण्डिलमथित्वाग्निंजस्वाचोपावरोहणं घृतंचदद्याद्शोपांतंत्र स्रुंजित्वा
शनक्रिया उपावरोहजातवेदऽमंप्रेतंस्वर्गायलोकायनयप्रजानन् आयुःप्रजं
रयिमस्मासुधेहिप्रेताजतीःपास्यजुषस्वस्वाहेत्युपावरोहणमंत्रः आत्मसमा
रोपेविशेषः मृतस्पाग्नेत्यतिर्ध्वेवमात्मन्यारोप्यचेन्मृतः प्रेतस्यदक्षिणंपाणिं
लौकिकाग्नेर्निधायहि शमीसमिधमादायमुखादग्निंनयेत्तथा उपावरोहमं
त्रेणततस्तत्रास्थिसंचरेत् अथाहिताग्नेःसन्यासमिच्छतःउत्सर्गेष्टिविधिः तत्र
जाबालश्रुतिः तद्धैकेप्रजापत्यामेवेष्टिंकुर्वंतीति अत्रवाक्यशेषेणानितिबऽ

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

वचनश्रवणादादित्याग्निविषयमेतदित्युक्तं विश्वेश्वरीये अथवा वैश्वानरीये
ष्टिं कुर्यात् अग्नये वैश्वानरायैकादशकपालं पुरोडाशं कुर्वंति प्राजापत्यं चरुं
वैष्णवं नवकपालं चेति तत्रैवोदाहृतत्वात् अत्रैव विशेषो बौधायनोक्तः
देवयजनोद्धरणमग्न्युत्पादनमुखवांतकृत्वा पक्वांहुतीर्जुहोति वैश्वानरीयप्रतिवे
दयामहीति पुरोनुवाक्यामन्त्र्य वैश्वानरः प वयन्नः पवित्रैरिति याज्यया जु
होति अथाज्याहुतीर्जुहोति वैश्वानरोनऊत्येत्यनुच्छंदसं अग्नयेस्वाहेति
च अथैनमुपतिष्ठते सहस्रशीर्षेत्यनुवाकेन स्विष्टकृत्प्रभृतिसिद्धमाधे
नुवरप्रदानात् अथाग्नेरग्निं दर्भस्तंबेषूद्धृतशेषं निदधाति सर्वविकृतो
विश्वेभ्यृतमिति द्वाभ्यामुत्सृजत्यग्निमायुर्दा अग्नेहविषइति अथयक्षा

ङ्गयादायप्रक्षाल्यप्राश्नाति सहस्रशीर्षेत्यनुवाकेन प्राश्यायाचम्यात्मानमभि
मृशति ॐब्रह्मेत्येतेनानुवाकेन अथाग्निद्रव्यमग्नौप्रक्षिप्यात्मन्यग्नीन्समारो
पयते यातेअग्नेयज्ञियातनूरितिपात्रप्रतिपत्तिमाहदक्षत्रियः मन्मयान्यश्मम
यानिवास्रुचौहोति गुरवेतैजसानिदद्यात्काष्ठपात्राण्याहवनीयेप्रक्षिप्यार
णीगार्हपत्येनिक्षिप्योत्तरवत्मुसलेदक्षिणाग्नौनिक्षिपेदित्युक्तंयमस्मृतावि
ति इत्युत्सर्गेष्टिविधिः अथसन्यासिनऔर्ध्वदेहिकविधिः विश्वेश्वरीये बौ
धायनशौनकौ यतीनांप्रेतसंस्कारविधिंव्याख्यास्यामः गृहस्थःस्वात्मानं
शेषतःस्नात्वागंधपुष्पादिभिरलंकृत्यशिक्येशरीरमारोप्यघोषितजयशब्दै
र्डिंडिमनिनादारवैरपिधायमात्स्वीमुदीचीवागत्वाच्छद्देशंसमाश्रयेत् नदी

तीरेप्वत्थ इक्षस्यब्रह्मइक्षस्यवाधस्ताद्देवयजनंदंडायामत्रमाणंरवात्वा
लवणंधक्षिप्यदर्भानास्तीर्यगायत्र्याशिरःप्रक्षाल्यपुरुषसूक्तेनस्नापयित्वा
शंखेनप्रणवेनशतसंख्येनस्नानंषोडशोपचारैर्गंधपुष्पैरलंकृत्यविस्तीर्यं
रक्षस्वेतिशरीरंकुंडेनिधायेदंविष्णुर्विचक्रमइतिदक्षिणहस्तेदंडंनत्कानि
धायहंसःशुचिषदितिहृदयदेशेजपेत् ब्रह्मजज्ञानमितिमूर्द्धदेशेजपेत्
पुरुषसूक्तेनस्तुवोर्मध्येजपेत् नमिर्नमिमगान्मातेतिमूर्द्धनंनिधात् अ
श्मन्नापरशुनावा ॐभूर्भुवस्वरोमितिमंत्रंजपेदाछाद्यलवणेनघनतरे
णसप्तम्याहृतिभिःप्रणवेनवादेवयजनंप्रत्ययेत् अग्निनाग्निःसमिध्यत
इत्यनुमंत्रयेत् नतत्रशेषसंस्कारोनाशौचंनोदकक्रिया तस्माद्भिन्नंशरवा

१२

त्वामदाह्याछादयेद्भशमिति कर्तुरादेर्वपनमुक्तंपित्रमेधपद्धतौ सन्निरुद्धो
यतेःपुत्रोयदिस्वपितृनाशनं कृत्वातुपवनंस्नात्वाभ्रह्मात्मायतिसक्रियां कु
र्यादितिशेषः स्नात्वेत्यूर्ध्वदेहिकाधिकारंसंपत्यर्थकृच्छ्रद्योतनार्थं अह
न्येकादशेप्राप्तेपार्वणंतुविधीयते असन्निरुद्धश्चेत्सुतःसिद्धिवातंपितुस्तदा
स्नुत्वेतिशेषः स्नात्वावपनमत्रैवचमुक्तायांतुतदंतरा दशम्यामेवकुर्यात्तुना
रायणबलिंसुतश्चेति नारायणबलिंबौधायनः नारायणबलिंवास्यकुर्वीतद्वा
दशेहनि कुर्याद्विप्रोमहाभूजांपायसंचनिवेदयेत् अन्नेऊत्वातुतच्छेषंव्याहृ
तीभिःसमाहितः यतीनहस्तान्साधून्वाग्रहीत्वाहादशावरान् अभ्यर्च्यगंध
पुष्पाद्यैर्मंत्रैर्दशनामभिः संभोज्यहव्येनान्नेनदक्षिणांचनिवेदयेत् त्रयोदशं

द्विजश्रेष्ठमात्मसंज्ञंजितेंद्रियं विष्णुंयथातथाभ्यर्च्यपाद्यार्घ्याद्यैर्विधानतः द
द्यात्सुरूपसत्क्रेनसुष्पहव्यादिकंक्रमात् वस्त्रालंकारणाद्यानियथाशक्तिप्रदाय
येत् उच्छिष्टसन्निधौतस्यदर्भानास्तीर्यभूतले ॐभूःस्वधाभुवःस्वधास्वःस्वधेति
बलीन्हरेत् इतिसन्यासिनऔर्ध्वदेहिकविधिः अथदाहसाधनेग्नौविरुद्धव
चनानांव्यवस्थोच्यते तत्रमदनरत्नेहरिहरयाज्ञवल्क्यः आहिताग्नेर्यथान्यायंद
ग्धव्यस्त्रिभिरग्निभिः अनाहिताग्निरेकेनलौकिकेनेतरोजनइति अनाहिता
ग्निःकेवलस्मार्त्ताग्निः इतरश्रौतस्मार्त्ताग्निरहितइतिव्याख्यातं तत्रैवब्रह्मपुरा
णे आहिताग्न्योश्चदंपत्योर्यस्त्वादौम्रियतेक्षुवि तस्यदेहःसपिंडैश्चदग्धव्यस्त्रि १२
भिरग्निभिः पश्चान्मृतस्यदेहस्तुदग्धव्योलौकिकाग्निना अनाहिताग्निदेहस्तु

दाह्योगृह्याग्निनाद्विजैः अत्राप्यनाहिताग्निःकेवलस्मार्त्ताग्निः लौकिकश्चंडा
लाग्न्यादिव्यतिरिक्तोग्राह्यः तथाचदेवलः चंडालाग्निरमेध्याग्निःसूतिकाग्निश्च
कर्हिचित् पतिताग्निश्चिताग्निश्चनोशिष्टग्रहणोचिताइति इतिचतत्रैवोक्तं स्म
स्यर्थसारेत्वेवदहनंब्रह्मचार्यादेरनग्निकस्यविधुरादेश्चकपालाग्निनास्वशा
खोक्तविधिनाकार्यं गृहस्थस्यगृह्याग्निनाकार्यं आहिताग्नेस्त्रेताग्निभिरिति ना
रायणश्चतौतु गृह्येणानाहिताग्नेस्तुदहेत्पत्नीवच्चर्ववत् कपाल्याग्नादहेन्यपु ८६
पवीतंतथानरं प्राक्संस्कारनयनात्प्रेतंलौकिकाग्निर्दहेन्नरं अग्निवर्णंकपालंतु
कृत्वातत्रविनिक्षिपेत् करीषादितोयोग्निर्जातःसतुकपाल जः उच्यतेतेनिधे
योग्निर्देशेतूत्तरपश्चिमे तथाशास्त्रांतरेदृष्टःप्रणीताःप्रणयेन्नतइति अत्रान्य

नुपवीतमित्यन्यशब्दःश्रौतस्मार्ताग्निरहितपरः इतरपदगोचरमदनरत्नसंवा
दात् स्मृत्यर्थसारसंवादाच्च इत्याविवमदनरत्नोदाहृतवचनेकपालाग्नेः इत्य
ग्न्यादानाभावेनलौकिकपदेनैवतदुपपत्तेश्च नवत्संवादानुपपत्तिः अग्निरा हि
त्यंचनप्रेक्षयोग्याहवनीयादिराहित्यंवि वक्षितं विच्छिन्नाग्नेरुत्सृष्टाग्नेर्विधुरा
ग्नेश्चाहिताग्नेरपिलौकिकाग्निनादाहप्रसंगात् तत्रनतमन्येनत्रेताग्निभ्योदहंती
तिआपस्तंबसूत्रादिविरोधात् किंत्वाहवनीयाद्यधिष्ठात्र्यादेवतयाराहित्यं अत
एवापस्तंबाश्वलायनोक्तानुसारेणपवमानहविषावैकल्पिकत्वेपिअग्न्यधाने
नित्यानि तानिविच्छिन्नाधानादौत्वनित्यानीतिदर्शयितुंआपस्तंब भाष्यकारेण
यदाहवनीयेजुहोतितेनसोमस्याभीष्टःप्रीतोभवतिदेवतात्म नःसंस्कारत्वात्स्वा

यग्निताधानेसंस्कृतस्यतस्यनसंस्कारापेक्षान्यदेवतात्मनोग्नेर्नीशः यदेवास्य
ज्योतिःपरायति तंतदेवाप्येतिज्योतिष्मतीष्टेर्देवताग्नेयनतावित्संस्कारत्वाभा
वात् आधानानंतरंयजमानएवाग्नेयइतिश्रुतेश्चनित्यविद्यमानत्वात्तौकिकज्यो
तिर्मात्रमेवसंस्कारमर्हतिनदेवताग्निरित्युक्तं संस्कारश्चैष्ट्यादिमात्रजन्यःप्रायश्चि
ताधानजन्यश्चेताधानजन्यश्चसर्वोप्यत्रविवक्षितः ज्योतिष्मतीष्टिप्रायश्चित्ताधा
नयोरुदाहरणात् संस्कारनित्यविशेषोक्तेश्च तथातेनैवभाष्यकारेणाग्निविच्छेद
वशेननित्यकर्मातिक्रमप्रायश्चित्तंविच्छिन्नाधानोत्तरंकर्त्तव्यमिति साधयितुमा
धानानंतरंयजमानएवाग्नेयइतिश्रुतेर्विच्छेददशायामप्यग्नित्वान्नित्येष्वधिका
रोस्तीत्युक्तं आश्वलायनिकाअग्न्यधानमुक्तभाष्यानुसारादिष्यंतमेव प्राय

श्चित्ताधानंसुवर्णोज्झत्यंतमपि अतोविधवाविधुरयोरग्न्याहिताग्नेर्नाग्निरहित
त्वनिमित्तकोलौकिकाग्निनादाहोमंतव्यः तयोश्चध्योक्तरीत्याअग्निमत्वात् अत
एवानग्निमतउक्तेत्यग्नेःसंस्कारकर्मणः च्छिद्रिःसंचयनंदाहान्मृताहस्तुय
थाति थीनिअंगिरोक्वनेमूलन्नतेसाग्नियदेनोक्तस्यापितन्मूलकत्रिंशल्लोकी
दाहादाहितान्यैर्मरणदिवसतोन्यत्रकुर्याद्दशाहमित्याहिताग्नियदेनग्रहणं
कृतं यथामूलंसाग्नियदोच्चारणेहिप्रत्यक्षाग्निमतएवग्रहणमितिन्नमस्यान्न
छून्यानामपिविधवादीनांनाध्योक्तरीत्याग्निमत्वात्तत्साग्निकयदेग्रहणमस्ती
तितेत्साधारणाहिताग्नियदप्रयोगःकृतश्चितदाशयोलक्ष्यते आचरंतित्वस १५
र्वदेशस्थशिष्टाः आहिताग्निविधुरादिदाहमपिमदनरत्नोदाहृतहृद्यायज्ञव

ल्क्यश्लोकप्रथमार्द्धविषयंमन्यमानाःप्रेताधानोत्यादितेस्त्रेताग्निभिःस्वीकुर्वंतित्व
दाहश्चमृत्येवदशाहाद्याशौचं यस्तुमृताहस्तुयथातिथीस्यंगिरोक्वनशेषःसआ
हिताग्नेस्त्रिपक्षोर्ध्वकालिनमासिकाब्दिकादिविषयः ततःस्वंस्वाह्येषुतुदाहस्ति
थ्यनुसारेणैवोचितं ऊर्ध्वंत्रिपक्षाद्यब्दांतमृतेहन्येवतद्वेत् अधस्तुकारये
द्दाहादाहितान्नेर्द्विजन्मनश्चतिमिताक्षरोदाहृतैकार्ण्यवचनात् अतःसिद्धमेतत् जात्
लौकिकेनेतरोजनश्चतिहृद्यायाज्ञवल्क्यश्लोकचतुर्थपादःश्रौतस्मार्ताग्निरहित
ब्रह्मचार्यादिपरश्चति नन्वेवमपिपश्चान्मृतस्यदेहस्तद्दग्धव्योलौकिकाग्निने
तिब्रह्मपुराणविरोधःस्यात्पश्चान्मृतस्याहिताग्नेर्विधुरादेर्नवताप्रेताधानोत्पा
दितत्रेताग्निभिर्दाहोंगीकारादितिचेन्नब्रह्मवचनालौकिकाग्निनादाहेपिपश्चा

त्तस्योपासनेनेतिचंद्रिकोदाहृतापस्तंबादिसूत्रविरोधः लौकिकपदेनोपासनो
च्यते विध्यंताधिकरणेऔपासनाधिकरणकेतिकर्त्तव्यतायालौकिकत्वव्यव
हारादितिचेन्न अनाहिताग्निदेहसंस्कारदाह्योगह्याग्निनेत्यनंतरवाक्येतुशब्दानुप
पत्तेः उक्तव्याहृत्यधीत्यर्थंएवतुवाअतिवादितिवत् विधुराग्निंप्रकृत्यनंतम
न्त्रेनाग्निन्योदहतीतिदेवताप्योदाहृतापस्तंबसूत्रविरोधश्चतवमतआपद्ये
तविधुराग्निपदस्यबोधायनानुसारीश्रीरंगराजोक्तव्याख्याएवस्वीकार्यत्वात् उ
ताधानंपरस्यत्वितिसूत्रेदाहृतकात्यायनवचनविरोधश्चअत्रपरपदेनपश्चान्म
ताग्निधानात् ननुवचनानांपरस्परविरोधमात्रंप्रसक्तं पश्चान्मृतस्यब्राह्मेलौकि
केनदाहःप्रतीयते चंद्रिकोदाहृतसूत्रेऔपासनेन देवताप्योदाहृतसूत्रेतन्नि

रति

षेधेनश्रेताधानोत्यादितत्रेताग्निर्निरितिकात्रव्यवस्थितिर्यत उक्तंवदेवः याज्ञिके
नमृताधानासंभवेपश्चान्मृतस्यब्रह्मपुराणाद्यौकिकाग्निनादाहोनिर्मथ्येनकपा
लाग्निनावेति उचितावैषाव्यवस्था अनाहिताग्निमग्निर्निरितिविशेषप्रवृत्तस्मृत्य
नुसारिणोदाहृतनिषेधेनमृताधानस्यावश्यककर्त्तव्यताधतिपत्तेः सर्वथैवत्रेता
ग्निसंभवेऽपूर्वविधानेकाम्येतन्मूलतयास्वि ष्टकृतानामौपासनादीनांस्वीकर्त्तुमुचि
तत्वात् आधानप्रकरणेह्यर्थेनोक्तं यस्यतुसर्वआहितस्तस्यनिर्मथ्यएवश्रुतनरा
धेयशब्दाख्यातंवेश्यमकारिरामेण औपासनाग्नावेतद्योनिर्निर्मथ्यंब्रह्मौदना
कमादधीत। अतःश्रोत्रियागारादाहृतमपियस्योपासनस्यपूर्वंसयोनिर्ब्रह्मौद
नश्रुति भारद्वाजः तयोर्यःपूर्वोग्नियेततस्याग्नित्रेतायांपित्रमेधःसंपद्यतेयःप

श्चात्तस्योपासनेनसहैव पित्रमेधोहिवचनलिंगान्मंत्रान्सन्नग्निमिति दा
रकर्मणियद्यशक्तआत्मार्थमग्न्याधेयमग्निहोत्रदर्शपूर्णमासायणार्थंचशेषाणि
कर्माणिनजनवंतीति अत्रकेचित् यःपश्चादविशेषोक्तमपिपत्नीविषयमेवावति
ष्ठते पुंसस्तुदारकर्मणिशक्तस्यतत्सा हचर्येणाहितैरशक्तस्यतुस्वार्थमाहितैरेव
त्रेताग्निनिर्दाहसंभवेननकदाचिदपितद्व्यतिरेकेणतत्संभवः।नचौ पासनेना
ग्नाहिताग्निंदहंतिनिर्मथ्येनपत्नीमितिनिर्मथ्यविधिविरोधःसर्वाधानिपत्न्याःपश्चा
न्मृतायानिर्मथ्येनदाहोर्ध्वाधानिपुत्रास्तोपासनेनेतिव्यवस्थोपपत्तेः औपासन
विधेरनाहिताग्निविषयेचरितार्थत्वाच्च तथाचार्ध्वाधानेपत्युःपूर्वमरणेऔपास १७
नोग्निःपत्नीदाहार्थंसंरक्षणीयः पत्युर्दारकरणासामर्थ्येतुपत्युःपूर्वमृतायाः

न

अपिपत्न्यानिर्मथ्येनैवदाहः यःश्रुत्वाग्निमेतस्याग्निमेतायांपित्रमेधइत्युक्तादा
रकर्मणियद्यशक्तइत्युक्तत्वात् पत्युर्दारकर्मणिशक्तिपक्षएवपत्न्याग्नेतायांदा
हपक्षव्यवस्थाएकनार्यानेकनार्यत्वेवादारकरणासामर्थ्येनपत्न्यानिर्मथ्येन
दाहेसतिअग्नीनुत्सर्गेष्योत्सृज्याग्न्याधेयंकर्तव्यं इत्थंसर्वमेतदाह मंडनः पु
नीवेद्विधवान्त्वाग्नीयेतकदाचन तदाश्रोताग्निश्रुत्वाग्निमंथ्येनैवस्यादिते।
पुनःपरिणयाधानेस्वामिनोमदग्निसिध्यतः पत्न्यैमृतायैनेताग्निंदद्यान्निर्मथ्य
मन्यथा तथैवानेकभार्यस्ययद्येकातत्रमृतायते नेछेत्पुनर्विवाहंवेन्निर्मथ्येनै
वतांदहेत् किंत्वेतावदिहाप्यस्तिदग्ध्वानिर्मथ्यवह्निं नाउत्सर्गेष्यात्यजेद् ग्नी
न्पुनस्तानादधीतवेति निर्मथ्येनदाहोन्नरंपुनराधेयनिमित्तेवाग्निविछेदेस

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

तिअग्न्याधेयमेवनोत्सर्गेष्टिरिति आहिताग्निर्मृतस्त्रीकअदधानोन्ययासह ह
तारंनादिधर्मोपिकृतसोमसरवोपिवा अकृतारंनसोमेज्यानार्यामेवानुवर्त्तते
नास्तिमाहेंद्रसान्नाय्यंसंतिसारस्वतादयः केचित्त्यजुःप्रधानत्वान्नाद्रियंते
तुयोषितं तेनेष्टोस्यान्महेंद्रेज्यानस्युःसारस्वतादयः ।इत्यनंतदेवकृतौ।
त्येष्टिपद्धतिःसमाप्ता। ।शुभमस्तुः। ।संवत्१८४२वे॰व॰१२

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY